Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १९०
मार्च - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### नूतनः मनुष्यः, पुरातनः अभिलाषः

आदिकाले जातं मनुष्यं वयम् आदिमानवं वदामः । तस्य संस्कृत्या सह अथवा भद्रतया सह कोऽपि सम्बन्धः न आसीत् । तदानीं 'भद्रता' शब्दः एव न आसीत् । अतः तस्याः बन्धनात् मनुष्यः मुक्तः आसीत् । व्यतीते काले संस्कृतेः जन्म अभवत् । सा अपि मनोहारिणीं पुत्रीं 'भद्रतां' प्रसूतवती । एतया भद्रतया आदिमानवस्य जीवने महत् परिवर्तनम् आनीतम् । तथापि तस्मिन् एकं मूलभूतं परिवर्तनं न अभवत् । तस्य नाम अस्ति – अभिलाषः ।

नूतनस्य जनस्य अपि अभिलाषः नूतनः नास्ति । सांस्कृतिकः विकासः निकामं भवतु, परन्तु अभिलाषः तु तथैव तिष्ठति । सांस्कृतिकः विकासः मनुष्यस्य ईश्वरदत्तं स्वभावं परिवर्तयितुं न शक्नोति ।

सङ्क्षेपेण वक्तुं शक्यते यत् मनुष्यः सांस्कृतिकं विकासं यथेष्टं करोति चेदपि तस्मिन् (मनुष्ये) स्थिरीभूतः आदिमानवस्य अभिलाषः कदापि न नश्यति । अयं पुरातनः अभिलाषः शास्त्राणाम्, उपदेशकानाम्, कर्मकाण्डानां वा सम्मानम् अपि न करोति । कः नाम एषः अभिलाषः ?

प्रत्येकं मनुष्यः स्नेहम् आनन्दं वा वाञ्छति । अद्यतनः मनुष्यः यावता प्रमाणेन स्नेहं वाञ्छति, तावता प्रमाणेन एव आदिमानवः अपि वाञ्छति स्म । तत्र स्नेहनस्य अभिव्यक्तिः भिन्ना भवितुम् अर्हति । यथा हि आदिमानवः प्रियजनस्य ध्वनिं श्रुत्वा सानन्दं प्रतिध्वनिं करोति स्म । (कारणं तदानीं भाषायाः विकासः न आसीत् ।) आधुनिकः मनुष्यः प्रियजनं काव्येन मधुरया शब्दरचनया वा तोषयति । फलं तु उभयत्र समानम् । स्नेहस्य दानं प्राप्तिः च मनुष्यस्य मुलभूतः – प्राकृतिकः अभिलाषः वर्तते । अतः एव सः शिक्षणात् बहुधा मुक्तः अस्ति । एतत् सम्यक् ज्ञातुम् ऋष्यशृङ्गस्य कथा स्मरणीया । ऋष्यशृङ्गः मुनिः आसीत् । वनवासी सः कदापि स्त्रियं न दृष्टवान् । तत् किमु स्त्रीचेष्टाज्ञानम् ? अथ कदाचित् अङ्गनरेशस्य लोमपादस्य प्रजाः वृष्टेः अभावात् पीडिताः अभवन् । तदा ऋष्यशृङ्गः कयाचित् गणिकया प्रलोभितः, राज्यं प्रति आनीतः च । अदृष्टशृङ्गारं मुनिं काचित् गणिका कथम् आकृष्टुं शक्तवती ? यतो हि मैथुनं प्राकृतिकम् अस्ति । तत् शिक्षणेन विनापि नित्यं प्रवर्तते । अनेन सह स्मरणीयं यत् शिक्षणम् अत्र निन्दनीयम् अपि नास्ति । कामशास्त्राणि अपि गृहस्थम् उपकुर्वन्ति एव । ततः कलात्मकान् पाठान् पठितुं शक्यते । तथापि मैथुनं प्रकृतिः अस्ति, परन्तु तस्मिन् सिक्तं कलाविधानं संस्कृतिः अस्ति । जीवने उभयम् आवश्यकम् इति प्रतिभाति ।

## विधेः वैचित्र्यम्

जगनः सुकुमारः च सुहृदौ। एकदा तौ नगरं प्रति प्रस्थितौ। जगनेन कश्चित् अस्वस्थः बन्धुः द्रष्टव्यः आसीत्। सुकुमारेण कतिचन वस्तूनि क्रेतव्यानि आसन्। दीर्घयात्रा इति कारणतः तौ समीपतरेण अरण्यमार्गेण गमनाय मतिं कृतवन्तौ। पूर्वं सः अरण्यमार्गः कस्यचित् राज्यस्य दुर्गभागः आसीत्। किन्तु सः भागः कदाचित् युद्धे नष्टः आसीत्। तत्रत्यानि भवनानि जीर्णानि आसन्। अवशेषाणाम् उपरि परितः च लताः वृक्षाः च प्रवृद्धाः आसन्।

एतेन मार्गेण तयोः मित्रयोः गमनसमये महती वृष्टिः आरब्धा। वृष्टितः रक्षणार्थं तौ किञ्चन जीर्णं भवनम् आश्रितवन्तौ। तदा आकस्मिकरूपेण तयोः पुरतः विद्यमानः कश्चन स्तम्भः भग्नः भूत्वा पतितः। भग्नात् स्तम्भात् स्वर्णनाणकैः पूर्णः कश्चन घटः प्राप्तः। तयोः महान् आनन्दः अभवत्।

प्रथमम् एतत् दृष्टवान् जगनः – ''अहो, अदृष्टं नाम एतत्। आवाभ्याम् एषा सम्पत् विभज्य स्वीकरणीया। इतरेषां कल्याणम् अपि करणीयम्'' इति उक्तवान्।

तदा सुकुमारः – ''आम् आम्। आवाभ्यां तथैव करणीयम्। किन्तु दिने गृहं प्रति एतावत्याः सम्पदः नयनमपि उचितं न। प्राचीनः एषः घटः अपि उन्नयनसमये भग्नः भवितुम् अर्हति। आवां रात्रौ आगच्छावः चेत् वरम्। एकं दृढं स्यूतम् आनयेव चेत् गृहं प्रति सुवर्णस्य नयनं सुकरं स्यात्। अतः नगरे आवयोः कार्यं समाप्य प्रतिगमनसमये अत्र आगच्छाव'' इति उक्तवान्।

एषः उपायः जगनाय अपि अरोचत। तौ तं घटं कस्यचित् वृक्षस्य कोटरे गोपितवन्तौ। वृष्टेः स्थगनानन्तरं तौ पुनश्च प्रयाणम् आरब्धवन्तौ। परेद्यवि मध्याह्ने तौ नगरं प्राप्तवन्तौ। 'कार्यस्य समाप्तेः अनन्तरं सूर्यास्तसमये अमुके स्थाने मेलनीयम्' इति ताभ्यां निर्णीतम्। जगनः बन्धोः दर्शनार्थं गतवान्। किन्तु सुकुमारः अरण्यं प्रत्यागत्य एकस्यां गोण्यां सर्वं सुवर्णं पूरयित्वा तां गोणीं कस्मिंश्चित् गर्ते स्थापयित्वा शिलाभिः आच्छादितवान्। मूलघटे मृत्तिकां पूरयित्वा अपरेण मार्गेण वृष्ट्यां नगरं प्राप्तवान्। पूर्वनिश्चिते स्थाने सः जगनेन मिलितवान्।

सुकुमारं दृष्ट्वा जगनः – ''कथं भवान् जलेन आर्द्रः ?'' इति पृष्टवान्। उद्विग्नः सुकमारः किम् उत्तरं वक्तव्यम् इति न ज्ञातवान्। स्खलद्वचोभिः सः – ''न। नाहम् आर्द्रः। एषा आर्द्रता तु स्वेदकारणतः'' इति उक्तवान्।

मुग्धः जगनः – ''भवतः क्रयणं समाप्तं किम् ?'' इति पुनः पृष्टवान्।

पुनश्च उत्तरं दातुम् अशक्तः सुकुमारः – ''मया वस्तूनि बन्धूनां गृहे स्थापितानि'' इति उक्तवान्। तेन स्वर्णं नेतुं स्यूतः अपि न आनीतः आसीत्। गमनमार्गे सुकुमारः बहु उद्विग्नः दृश्यते स्म। सः मित्रम् उद्दिश्य– ''जगन, भवान् प्रथमं घटं दृष्टवान्। भवता एव सुवर्णस्य अधिकः भागः प्राप्तव्यः'' इति उक्तवान्।

तदा जगनः – ''एतत् भवतः औदार्यं द्योतयति। किन्तु आवाभ्यां सम्पदः समभागः एव करणीयः। तथापि आवाभ्यां मिलित्वा ग्रामार्थं कश्चन भागः व्ययीकरणीयः। भवान् जानाति एव। एकः राजा अस्माकं ग्रामस्य पार्श्वे शतात् वर्षेभ्यः पूर्वं कासारं निर्मितवान् आसीत्। इदानीं सः कासारः मृत्तिकया पूर्णः सन् लघुः जातः अस्ति। ततः समग्रः पङ्कः निस्सारणीयः'' इति उक्तवान्। ''उत्तमः विचारः एषः'' इति सुकुमारः उक्तवान्। ताभ्यां यदा दुर्गस्य स्थानं प्राप्तं तदा मध्यरात्रः अतीतः आसीत्। किन्तु तत्र जगनेन किं दृष्टम् ? घटः आकण्ठं मृत्तिकया पूर्णः आसीत्।

तत् दृष्ट्वा सुकुमारः – ''दुर्दैवं नाम एतदेव। पूर्वस्मिन् जन्मनि आवाभ्यां कोऽपि वञ्चितः स्यात्। अतः दैवेन

एवंविधया आवां वञ्चितौ। दैवेन अस्मभ्यं सुवर्णं दर्शितम्। यदा आवां तत् प्राप्तुम् इष्टवन्तौ तदा तत् सुवर्णं मृत्तिकारूपेण परिवर्तितं जातम्'' इति उक्त्वा हस्तेन ललाटं घट्टयन् रोदनम् आरब्धवान्।

'मित्रेण किं कृतं स्यात् ?' इति अवगमन–सामर्थ्यं जगनस्य आसीत् एव। किन्तु सः शान्तरूपेण सुकुमारस्य सान्त्वनं कृतवान्– ''भवतु नाम, तत् सुवर्णम् आवाभ्यां सम्पादितं तु न आसीत्। प्रवृत्तं सर्वं स्वप्नं भावयतु। अस्माकं तु किमपि न नष्टम्। तत् सुवर्णम् अस्माकं न आसीत् एव'' इति।

सुकुमारः अनुक्षणं रोदनं स्थगितवान्। परेद्यवि सायं सुकुमारः एकाकी अरण्यं गत्वा तां सम्पदां गृहं प्रति आनीतवान्। दिने दिने सम्पदः वर्धनं जातम् इव दर्शितवान्। वाणिज्ये साफल्यं प्राप्तम् इति सः सर्वान् वदति स्म। वास्तविकं कारणं जगनः एकः एव जानाति स्म। अतः सः सन्मार्गेण एव स्वभागं प्राप्तुम् अवसरं प्रतीक्षणमाणः आसीत्। सः मृत्तिकया सुकुमारस्य एकां प्रतिमां निर्मितवान्। प्रतिमा उपवेशनभङ्ग्याम् आसीत्। प्राणिनां पालने बहुरुचिः आसीत् जगनस्य। तस्य गृहे इतरैः लघुप्राणिभिः सह सद्यः एव प्राप्तौ द्वौ वानरशिशू अपि आस्ताम्। जगनः प्रतिमायाः अङ्के, भुजयोः शिरसि च कलायान् स्थापयति स्म। वानरौ कलायान् अन्विष्य खादतः स्म। एवमेव प्रतिदिनं प्रचलति स्म।

सुकुमारः सपत्नीकः दीर्घकालं यावत् तीर्थयात्रां प्रति गन्तुम् इष्टवान्। तौ जगनमपि आहूतवन्तौ। किन्तु जगनः तीर्थयात्रां प्रति गमनस्य स्थितौ न आसीत्। अनन्तरं सुकुमारः – 'मम आगमनपर्यन्तं मम पुत्रयोः पालनं करोतु' इति निवेदितवान्। सुकुमारस्य एकः पुत्रः षड्वर्षीयः, अपरः अष्टवर्षीयः। जगनः तयोः बालयोः पालनं सहर्षम् अङ्गीकृतवान्। सुकुमारः पुत्रौ जगनस्य गृहे त्यक्त्वा गतवान्। जगनः बालौ प्रीत्या एव पश्यति स्म। बालाभ्याम् आम्रफलानि नितरां रोचन्ते इति जगनः ज्ञातवान्। अतः सः तौ आहूय – ''वत्सौ, मम मातुलस्य विशाला आम्रवाटिका अस्ति। तत्र बहुविधानि आम्राणि सन्ति। भवन्तौ पक्षं यावत् तत्र गत्वा आगच्छताम्। यथेच्छं मधुराणि आम्राणि खादित्वा आनन्दम् अनुभवताम्'' इति सूचितवान्। बालौ सन्तोषेण एतं प्रस्तावम् अङ्गीकृतवन्तौ। एवं बालौ सुदूरस्थं सुरक्षितस्थानं प्रेषितौ जगनेन।

सप्ताहानन्तरं सुकुमारः सपत्नीकः प्रत्यागतवान्। सुकुमारः जगनेन मिलित्वा पुत्रयोः पालनार्थं धन्यवादान् समर्पितवान्। पुत्रौ गृहं प्रति नेतुम् इष्टवान्। जगनः खिन्नः इव दृश्यते स्म। सः सुकुमारम् आसन्दे उपवेश्य – ''भोः मित्र ! दुर्दैवं कथं भवति इति इतरेषाम् अपेक्षया आवाम् अधिकं जानीवः खलु। एकदा शुद्धं सुवर्णं मृत्तिकारूपेण परिणतम् आसीत् इति भवान् जानाति एव। पुनश्च तादृशेन दैवेन एव द्वौ बालकौ वानररूपेण परिवर्तितौ स्तः। किन्तु तौ वानरौ बहु उत्तमौ'' इति उक्तवान्। सुकुमारः साश्चर्यम् उच्चस्वरेण – ''किं मम पुत्रौ वानरौ जातौ ?'' इति पृष्टवान्।

तदा जगनः – ''आम्। किन्तु तौ सुन्दरौ स्तः। तयोः दर्शनेन महान् आनन्दः भवति'' इति उक्त्वा तत्र तौ वानरौ आनीतवान्। प्रतिमायाः सादृश्यस्य कारणतः तौ वानरौ अभ्यासबलात् कलायान् अन्वेष्टुं सुकुमारस्य उपरि कूर्दनं कृतवन्तौ। तौ तस्य अङ्के, शिरसि, भुजयोः च कलायान्वेषणम् आरब्धवन्तौ।

तदा जगनः – ''पश्यतु। पितुः विषये कियती प्रीतिः एतयोः'' इति उक्तवान्। सुकुमारः क्षणं यावत् स्तब्धः। मित्रं जगनः चतुरः, न तु मूर्खः इति सः अवगतवान्। सः किमपि अकथयित्वा गृहं गत्वा गोणीमितं सुवर्णम् आनीय अर्धभागं जगनाय दत्तवान्। तेन किञ्चित् एव सुवर्णं व्ययितम् आसीत्। जगनः अनन्तरं सुकुमारं स्वस्य मातुलस्य गृहं प्रति नीतवान्। बालौ आम्रवाटिकायाम् उत्साहेन क्रीडन्तौ आस्ताम्। तौ यथापूर्वं पित्रा सह व्यवहरन्तौ समीपम् आगतवन्तौ, वानरौ इव न। सुकुमारः तौ सन्तोषेण गृहं नीतवान्।

# रम्या रामायणी कथा

डॉ. सुखेश्वरः झा

रम् धातोः कर्मणि यति सति निष्पन्नस्य रम्य शब्दस्य स्त्रीत्वे 'रम्या' इति। रामः दाशरथिः। रमन्ते योगिनो यस्मिन् इति वा रामः। योगि-ध्यान-गम्यः सोऽति व्यापनशीलो जगदीश्वर एव धर्म-संस्थापनार्थं दशरथ-सुत-भावेनावतीर्णो मर्यादा-पुरुषोत्तमतां गतः। अय् धातोः ल्युटि (भावे, करणे वा) अयनम् इति। गतिः, पन्थाः इति वा तदर्थः। अत्र गत्या पथा वा न केवलम् उत्तरदेश-संयोगानुकूलः पादसञ्चालन-व्यापारः तत् करण-भूतः मार्ग एव वा बुद्ध्यतेऽपितु लक्षणया सर्वम् आचरणं सर्वो व्यवहारः सर्वं चरितम् अवगम्यते (गतिविधिः, महाजनो येन गतः सः पन्थाः इत्यादौ गत्या पथा च तथैव बोधात्)। रामस्य अयनं यत्र तत् रामायणम्। रामायणस्य इयं रामायणी। कथनं कथा, कथ्यते इति वा कथा। तथा च- रामचरितमाधृत्य कृतस्य आदि-काव्यस्य प्रतिपाद्यं वस्तु रमणीयम् इति सङ्कलितार्थः।

कथा कल्पना-प्रसूता कोष-कार-सम्मता। रामविषयको वृत्तान्तश्चेतिहासभूतः। अयोध्या तस्य जनिभूः। सरयू-जल-क्षालन-पूतजनाऽधुनापि रामस्य, तद्वंशीयोत्कृष्ट-नरपति-सहस्रस्य च वियोग-व्यथां वहन्ती भारतावयवतया प्राणिति। रामस्य अर्द्धाङ्गिन्याः सीतायाः प्रसवित्री मिथिला विदेहभूमिः, तया पूजितत्वेन प्रसिद्धायाः गिरिजायाः मन्दिरं, नयपाल-देशैक-देशीभूता जनक-पुराभिधानालङ्कृता जनकानाम् आवासभूमिः, दण्डकारण्यानी, लङ्काद्वीपम् इत्यादीनि बहूनि तत्त्वानि राम-वृत्तस्यैतिहासिकतां प्रत्याययन्तीव राजन्ते। तस्मात् 'रम्या रामायणी वार्तेति' वक्तुमुचितम्।

सेयं रामायणी कथा आदिकविना भुवनोपजीव्येन वाल्मीकिना लिखिता। वाल्मीकेः विलक्षण-कवित्वशक्तेः उन्मेषस्य, जगतीतलैकवीरस्य चरित्रवतोऽतिशयेनादर्शभूतस्य काव्यनायकस्य साधार-निर्धारणवृत्तान्तस्य च विवरणेन सह मर्यादापुरुषोत्तमस्य श्रीरामस्य जन्मनः पूर्वपीठिकातः आरभ्य अन्ते सभ्रातृकस्य तस्य विष्णुतेजसि प्रवेशस्य घटनां यावत् समग्रं रामचरितं रमणीय-शब्दार्थमय-वर्णनद्वारा साधु पल्लवितम्। सुविस्तृतत्वात् सुविश्रुतत्वाच्च नेह प्रतायते।

अस्याः कथायाः रमणीयता च असन्दिग्धा। शताब्द्यः सहस्राब्द्यो वा अत्यायन्, अत्येतारो वा, रामायणोदन्तः नित्य-नूतनः अहर्निशं लोकानां कोट्या सानन्दं सस्पृहं पापठ्यमानो राजते। क्रूरस्य कालस्यापि अपरिहार्यं हस्ता-मर्शमपाकरोति।

सा च रमणीयता सतत-लोक-संहति-हित-भावना-शिक्षण-मूला 'रामादिवद् आचरितव्यं न रावणादिवद्' इति ध्वन्यमानोपदेशामृत-विवरण-मूलेति मन्तव्यम्।

करुणा-वरुणालयो महर्षिः भगवान् वाल्मीकिः। स लोक-दुःस्थितिम् आर्ष-दृष्ट्या स्पष्टं ददर्श। जगदिदं सर्वं दुःखपूर्णम्। कष्टं च विशेषतो दुर्भावनामूलम्। लोका लोभाविष्टाः। ईर्ष्यया असूयया भरिताः। अन्य-शुभ-द्वेषिणः। भूगत-सकल-साधनोपभोगाक्षमत्वेऽपि सबलं सर्वम् आत्माधीनं चिकीर्षवः। किन्तु एकः सर्वसाधारणो गुणः एषः यत् ते परान् अनुचिकीर्षवो भवन्ति। ऋषिरचिन्तयत्। एतदेव मानव-मानस-गुणाधानस्य प्रशस्तं द्वारम् इति। एतेन सद्भावना हृदयं प्रवेक्ष्यति। अलोभः प्रवेक्ष्यति। त्यागः प्रवेक्ष्यति। आज्ञाकारिता प्रवेक्ष्यति। सौभ्रात्रं प्रवेक्ष्यति। सौहार्दं प्रवेक्ष्यति। सुजनता प्रथिता भविता।

(क्रमशः... )

# मासवार्ता

## आरब्धा उपनिषद्-व्याख्यानमाला



संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानम् चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनं नियमितं क्रियते । एतस्मिन् एव उपक्रमे उपनिषद्-व्याख्यानमाला आरब्धा वर्तते । आयोजनेऽस्मिन् एकादश उपनिषदः स्वीकृत्य विद्वांसः मार्गदर्शनं प्रदास्यन्ति । अस्यां व्याख्यानश्रेण्यां फरवरीमासस्य २३ दिनाङ्के स्वामी श्रीपरमात्मानन्दः सरस्वती 'ईशावास्योपनिषद्' इति विषये, फरवरीमासस्य २६ दिनाङ्के स्वामिनी परप्रज्ञानन्दा सरस्वती 'केनोपनिषद्' इति विषये च व्याख्यानं प्रायच्छताम् । व्याख्यानं श्रुत्वा संस्कृतरसिकाः प्रसन्नाः आसन् ।

## आरब्धः संस्कृतभाषाशिक्षणवर्गः




संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमी संस्कृतभाषाशिक्षणस्य अनेकान् वर्गान् नियमितम् आयोजयति । एतस्मिन् एव उपक्रमे फरवरीमासस्य २१ दिनाङ्के संस्कृतभाषाशिक्षणस्य प्राथमिकः वर्गः आरब्धः वर्तते । वर्गेऽस्मिन् १५ छात्राः प्रवेशं स्वीकृतवन्तः । वर्गः अयं मईमासस्य २० दिनाङ्कं यावत् प्रचलिष्यति ।

## आरब्धः स्तोत्रपाठवर्गः

संस्कृतस्तोत्रं पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्कृतस्तोत्रपाठनाभ्यासक्रमः सञ्चाल्यते । उपक्रमेऽस्मिन् फरवरीमासस्य १० दिनाङ्के वर्गोऽयम् आरब्धः वर्तते । अस्मिन् वर्गे छात्राः गणेशपूजनं शिवपूजनं च पठिष्यन्ति । वर्गोऽयं मार्चमासस्य १५ दिनाङ्कं यावत् प्रचलिष्यति ।

## कृपया हसन्तु

गृहस्य पुरतः याचमानं भिक्षुकं दृष्ट्वा -

गृहिणी - (भिक्षुकं प्रति) सुदृढकाययुक्तोऽसि त्वम् । किमर्थं किमपि कार्यं कृत्वा आजीविकां न सञ्चालयसि ?

भिक्षुकः - (गृहिणीं प्रति) अतीव सौन्दर्ययुक्तं वदनं, लतावत् अनुकान्तिः च वर्तते भवत्याः । भवती किमर्थं चलनचित्रेषु अभिनेत्री न अभवत् ? गृहे भूत्वा पाकः, पात्रक्षालनमित्यादिकार्येषु किमर्थं व्यापृताऽस्ति आदिनम् । एकैकस्याऽपि शिरोलिखितं यत् भवति, तदेव भवति ।

गृहिणी - (पुत्रमुद्दिश्य) वत्स ! धनस्युताद् शतरूप्यकाणि स्वीकृत्य ददातु एतस्मै कृपार्हाय भिक्षुकाय ।

★ ★ ★ ★ ★

'१००० पृष्ठात्मकम् एकं पुस्तकं पठितुं कियान् समयः अपेक्षितः ?' इति कश्चन अपृच्छत् ।

लेखकः - षड्मासाः ।

वैद्यः - (सोत्साहम्) मासद्वयम् ।

अधिवक्ता - (आत्मविश्वासेन) अहम् एकस्मिन् मासे एव १००० पृष्ठात्मकं पुस्तकं समापयामि ।

अभियन्ता छात्रः -परीक्षा कदा अस्ति ? इति पूर्वं सूचयन्तु । एकस्मिन् दिने एव सम्पूर्णं पुस्तकं समापयिष्यामि ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**काकतालीयवत्प्राप्तं दृष्ट्वापि निधिमग्रतः ।**
**न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥**

**तात्पर्यम्** – काकतालीयरूपेण निधिः पुरतः दृश्यते चेदपि तं निधिं प्राप्तुं किञ्चिद्वा परिश्रमः करणीयः भवति। अन्यथा स्वयं दैवः आगत्य निधिं हस्ते न ददाति।

**काकुत्स्थस्य दशाननो न कृतवान्दारापहारं यदि क्वाम्भोधिः क्व च सेतुबन्धघटना क्वोत्तीर्य लङ्काजयः ।**
**पार्थस्यापि पराभवं यदि रिपुर्नाधात्क्व तादृक्पणो नीयन्ते रिपुभिः समुन्नतिपदं प्रायं परं मानिनः ॥**

**तात्पर्यम्** – यदि रावणः रामस्य पत्नीं सीतां न अपाहरिष्यत् तर्हि कथं वा समुद्रस्य सेतुबन्धनम् अभविष्यत् ? कथं वा हनूमतः समुद्रोल्लङ्घनं, कथं वा समुद्रम् उत्तीर्य रावणवधः अभविष्यत् ? तथैव यदि दुर्योधनादयः अक्षक्रीडायां तादृशं पणं न अस्थापयिष्यन्, तर्हि अर्जुनस्य युद्धे जयं कथं वा अभविष्यत् ? एवं शत्रवः अपि मानिनाम् औन्नत्यप्राप्तये कारणीभूताः भवन्ति।

**कान्ताकटाक्षविशिखा न लुनन्ति यस्य चित्तं न निर्दहति कोपकृशानुपातम् ।**
**कर्षन्ति भूरि विषयाश्च न लोभपाशात् लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥**

**तात्पर्यम्** – यस्य चित्तं प्रियायाः अतितीक्ष्णा दृष्टिः न लुनाति, कोपाग्निश्च न दहति, लोभवशात् यस्य इन्द्रियाणि विषयेषु आसक्तानि न भवन्ति स एव धीरः लोकत्रयमपि जयति।

## ज्ञानसरिता

श्यामः पटेलः

**लोकप्रियं रक्तफलम्** – एतस्मिन् काले सूपस्य शाकस्य सेण्डविचखाद्यस्य वा पिज्जाखाद्यस्य निर्माणे विशेषोपयोगी भवति रक्तफलम् । इदं रक्तफलम् अस्माभिः शाकरूपेण व्यपदिश्यते । किन्तु वनस्पतिशास्त्रस्य अनुसारम् एतत् फलम् अस्ति । रक्तफलस्य उत्पादनं कृषकैः प्रथमवारं ख्रीस्ताब्दस्य सप्तम्यां शताब्द्याम् अमेरिकामहाद्वीपे आरब्धम् । षोडश्यां शताब्द्यां रक्तफलं प्रेमास्पदं नामद्वयं प्राप्नोत् । (१) एपल ऑफ पेरेडाइज (२) एपल ऑफ लव इति । तस्यामेव शताब्द्यां रक्तफलस्य शुभागमनं भारतदेशं प्रति पोर्टुगीझजनैः सह अभवत् । गच्छता कालेन अष्टादश्यां शताब्द्याम् आङ्ग्लजनाः भारतदेशे एतस्य उत्पादनाय कृषिकार्यस्य आरम्भं कारितवन्तः । तदाऽरभ्य रक्तफलं लोकप्रियं सञ्जातम् । रक्तफलस्य उपयोगः भोजने ‘‘सॉस’’ वा ‘‘केचप’’ नाम उपसेचनरूपेण भवति । अधुना विश्वे रक्तफलस्य ७५०० यावत्यः प्रजातयः सन्ति । तेभ्यः रक्तवर्णीयानां रक्तफलानाम् उत्पादनम् अधिकं भवति । भवतु नाम एतत् रक्तफलं रक्तवर्णत्वात् रक्तफलं कथ्यते । किन्तु पीतवर्णीयानां पाटलवर्णीयानां श्वेतवर्णीयानां च रक्तफलानाम् उत्पादनम् अपि भवति । रक्तफलस्य उपयोगः केवलं भोजनार्थं न भवति । किन्तु क्रीडार्थम् अपि भवति । स्पेनदेशे तु ‘‘ला टामेटिना’’ नाम विश्वप्रसिद्धः उत्सवो भवति । यस्मिन् जनाः परस्परं रक्तफलस्य क्षेपणं कुर्वन्ति । तत्र रक्तफलानां निचयस्य उपरि लुठनस्य नृत्यस्य च स्पर्धा आयोज्यते ।

रक्तफलम् – tomato, व्यपदिश् – refer to, उपसेचनम् – chutney, क्षेपणम् – throwing
लुठनम् – wallowing, निचयः – heap

## शब्दमञ्जूषा

| | |
|---|---|
| **अग्निनौका** | steamer |
| **हृद्गतिश्रावकयन्त्रम्** | stethoscope |
| **पादपीठम्** | stool |
| **पाचकयन्त्रम्** | stove |
| **रथ्या** | street |
| **अधीक्षकः** | superintendent |
| **परिवीक्षकः** | supervisor |
| **परिवीक्षणम्** | supervision |
| **उच्चतमन्यायालयः** | supreme court |
| **सर्वेक्षकः** | surveyor |
| **पद्धतिः** | system |
| **आधारफलकम्** | table |
| **लाङ्गूलम्** | tail |
| **बुद्धिः** | talent |
| **दृश्यश्रव्यचलचित्रम्** | talkies |

## किं भवन्तः जानन्ति ?

**१ ) एकस्मिन् मासे कति पक्षाः भवन्ति ?**
(क) ३ (ख) ४ (ग) २ (घ) ५

**२ ) चान्द्रवर्षं कति दिनानां भवति ?**
(क) ३५० (ख) ३५२ (ग) ३५४ (घ) ३५६

**३ ) सौरवर्षं कति दिनानां भवति ?**
(क) ३६५ (ख) ३६६ (ग) ३६७ (घ) ३६८

**४ ) भारतीयमान्यतानुसारं कति ग्रहाः सन्ति ?**
(क) ८ (ख) ९ (ग) १० (घ) ११

**५ ) कति उपनिषदः सन्ति ?**
(क) ७ (ख) ७० (ग) ८० (घ) १०८

**६ ) कति पुराणानि सन्ति ?**
(क) १६ (ख) १७ (ग) १८ (घ) २०

**७ ) कति युगानि सन्ति ?**
(क) ३ (ख) ५ (ग) ४ (घ) ६

उत्तराणि – (१) ग (२) ग (३) क (४) ख (५) घ (६) ग (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Learn Online
## संस्कृतभाषाशिक्षणम्
## First level

**Date :** 4/4/22 to 29/6/22
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 5000/-

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Learn Online
## छन्दःपरिचयः
## First level

**Date :** 15/3/22 to 14/4/22
**Day :** Tuesday, Thursday
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 2500/-

## Admission Open 2022-23

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**(Class SKg to 8)**
**Online / Offline**

## संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

### ग्राहक शुल्कम्

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

''संस्कृतसाम्प्रतम्'' मासिकस्य विषये पत्रक्रमाङ्क ४ अनुगुणं विवरणम् ।

१. प्रकाशनस्थानम् – ''एकलव्य संस्कृत एकेडेमी'' कोर हाउस, ओफ सी.जी.रोड, परीमलगार्डन समीपम्, एलिसब्रिज, अमदावाद-६
२. प्रकाशनकालः – मासिकः
३. मुद्रकः प्रकाशक :- मिहिर उपाध्यायः राष्ट्रियता – भारतीयः
४. सम्पादकः – मिहिर उपाध्यायः राष्ट्रियता – भारतीयः
संङ्केतः – 'एकलव्य संस्कृत एकेडेमी'' कोर हाउस, ओफ सी. जी. रोड, परीमलगार्डन समीपम्, एलिसब्रिज, अमदावाद- ६
५. सदस्यनाम मिहिर उपाध्यायः, सम्पादकः
संङ्केतः - ''एकलव्य संस्कृत एकेडेमी'' कोर हाउस, ओफ सी.जी.रोड, परीमलगार्डन समीपम् एलिसब्रिज, अमदावाद- ६

अहं मिहिर उपाध्यायः घोषयामि यत्, उपरोक्ताः अंशाः नियमानुसारं योग्याः सन्ति ।

दिनाङ्कः १/०३/२०२२

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006